"विवस्वानिव तेजोभिर्नभस्वानिव वेगतः।
राजा चरेज्जगत् सर्व्वं प्राप्नुयाल्लोकसम्मतेः॥
तर्केङ्गितज्ञः स्मृतिमान् स्वीयभावाप्रकाशकः।
क्लेशायाससहो दक्षः सर्व्वत्र भयवर्जितः॥
सुभक्तो राजसु तथा कार्य्याणां प्रतिपत्तिमान्।
नृपो निहन्याच्चारेण परराष्ट्रं विचक्षणः॥
कालज्ञो मन्त्रकुशलान् संवत्सरचिकित्सकान्।
तथान्यानपि युञ्जीत समर्थान् शुद्धचेतसः॥
अक्रुद्धांश्च तथालुब्धान् दृष्टार्थान् तत्त्वभाषिणः।
पाषण्डिनस्तापसादीन् परराष्ट्रे नियोजयेत्॥
स्वदेशपरदेशज्ञान् सुशीलान् सुविचक्षणान्।
वार्त्ताहर्य्यान् बहूंश्चैव चराणां विनियोजयेत्॥
नैकस्य वचने राजा चारस्य प्रत्ययं वहेत्।
द्वयोः सम्बन्धमाज्ञाय तद्युक्तं कार्य्यमारभेत्॥
तस्माद्राजा प्रयुञ्जीत चरान् बहुसुखान् बहून्।
नीरेतोवामनाः कुब्जास्तद्विधा ये च कारवः॥
भिक्षुक्यश्चारणा दास्यो मालाकार्य्यः कलाविदः।
अन्तःपुरगतां वार्त्तां निर्हरेयुरलक्षिताम्॥
प्रकाशश्चाप्रकाशश्च चरस्तु द्विविधो मतः।
अप्रकाशोऽयमुद्दिष्टः प्रकाशो दूतसंज्ञकः॥"
इति भोजराजकृतयुक्तिकल्पतरुः॥ * ॥
अक्षद्यूतभेदः। भौमः। चलः। इति मेदिनी। रे, ३०॥ खञ्जनपक्षी। इति शब्दमाला॥ कपर्द्दकः। इति राजनिर्घण्टः॥ मेषकर्कटतुलामकरलग्नानि। इति ज्योतिषम्॥ अस्थिरविभूतिमित्रं चलमटनं स्खलितनियममपि चरभे। इति दीपिका॥ (यथा, तिथितत्त्वे।
"चरलग्ने चरांशे वा स्थापनञ्च विसर्ज्जनम्॥"
जङ्गमे, त्रि। यथा मनुः। ७। १५।
"तस्य सर्व्वाणि भूतानि स्थावराणि चराणि च॥"
तथाच चरके सूत्रस्थाने २७ अध्याये।
"चरः शरीरावयवाः स्वभावो धातवः क्रिया।
लिङ्गं प्रमाणं संस्कारो मात्रा चास्मिन् परीक्ष्यते॥
चरोऽनूपजलाकाशधन्वाद्यो भक्ष्यसंविधिः।
जलजानूपजाश्चैव जलानूपचराश्च ये॥
गुरुभक्ष्याश्च ये सत्त्वाः सर्व्वे ते गुरवः स्मृताः॥")
चरकः, पुं, (चर एव। स्वार्थे कन्।) चारः। इत्युणादिकोषः॥ पर्पटः। इति राजनिर्घण्टः॥ (चरति गच्छति वेत्ति वेदवेद्यकादीनि सर्व्वशास्त्राणीति। चर+अच् ततः कन् च। यद्वा चर इव मह्यीवृत्तं द्रष्टुमागतः। चर+इवार्थे कन्।) मुनिविशेषः। तत्कृततन्नामकग्रन्थः। तयोरुत्पत्तिर्यथा,—
"यदा मत्स्यावतारेण हरिणा वेद उद्धृतः।
तदा शेषश्च तत्रैव वेदं साङ्गमवाप्तवान्॥
अथर्व्वान्तर्गतं सम्यगायुर्व्वेदञ्च लब्धवान्।
एकदा स मह्यीवृत्तं द्रष्टुं चर इवागतः॥
तत्र लोकान् गदैर्ग्रस्तान् व्यथया परिपीड़ितान्।
स्थलेषु बहुषु व्यग्रान् म्रियमाणांश्च दृष्टवान्॥
तान् दृष्ट्वातिदयायुक्तस्तेषां दुःखेन दुःखितः।
अनन्तश्चिन्तयामास रोगोपशमकारणम्॥
संचिन्त्य स स्वयं तत्र मुनेः पुत्त्रो बभूव ह।
यतश्चर इवायातो न ज्ञातः केनचिद्यतः॥
तस्माच्चरकनामासौ विख्यातः क्षितिमण्डले।
स भाति चरकाचार्य्यो देवाचार्य्यो यथा दिवि॥
सहस्रवदनस्यांशो येन ध्वंसो रुजां कृतः।
आत्रेयस्य मुनेः शिष्या अग्निवेशादयोऽभवन्॥
मुनयो बहवस्तैश्च कृतं तन्त्रं स्वकं स्वकम्।
तेषां तन्त्राणि संस्कृत्य समाहृत्य विपश्चिता॥
चरकेणात्मनो नाम्ना ग्रन्थोऽयं चरकः कृतः॥"
इति भावप्रकाशः॥
चरटः, पुं, (चरति नृत्यतीव विचरतीर्थः। चर+बाहुलकात् अटच्।) खञ्जनपक्षी। इति शब्दमाला॥
चरणं, क्ली, (चर+भावे ल्युट्।) गमनम्। (यथा, ऋग्वेदे। ९। ११३। ९।
"यत्रानुकामं चरणं त्रिनाके त्रिदिवे दिवः॥")
भक्षणम्। (यथा, मनुः। २। १८६।
"अकृत्वा भैक्षचरणमसमिध्य च पावकम्।
अनातुरः सप्तरात्रमवकीर्णिव्रतञ्चरेत्॥")
आचारः। इति हेमचन्द्रः। ३। ५०७॥ (यथा, ऋग्वेदे। १०। १३६। ६।
"अप्सरसां गन्धर्व्वाणां मृगाणां चरणे चरन्॥")
चरणः, पुं क्ली, बह्वृचादिः। (यथा, पञ्चतन्त्रे। ४।३।
"न पृच्छेच्चरणं गोत्रं न च विद्यां कुलं न च।
अतिथिं वैश्वदेवान्ते श्राद्धे च मनुरब्रवीत्॥"
अपि च महाभाष्यवचनम्। यथा,—
"सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणैः सह॥"
"चरणशब्दो वेदैकदेशवाची कठादिरूपः।" इति मुग्धबोधटीकाकृद्दुर्गादासः॥) मूलम्। गोत्रम्। इति मेदिनी। णे, ४७॥ (चरतीति। चर+ल्युः। चरत्यनेनेति करणे ल्युट् वा। अधमाङ्गम्। तत्पर्य्यायः। पादः २ पत् ३ अङ्घ्रिः ४। इत्यमरः। २। ६। ७१॥ विक्रमः ५ पदः ६ आक्रमः ७। इति राजनिर्घण्टः॥ क्रमणः ८ चलनः ९ क्रमः १०। इति हेमचन्द्रः। ३।२८०॥ पदम् ११ पात् १२। इति जटाधरः॥ (यथा, मनुः। ९। २७७।
"अङ्गुलीग्रन्थिभेदस्य छेदयेत् प्रथमे ग्रहे।
द्वितीये हस्तचरणौ तृतीये वधमर्हति॥"
श्लोकचतुर्थभागः। यथा, वृत्तरत्नाकरे १ अध्याये।
"शेषं गाथास्त्रिभिः षड्भिश्चरणैश्चोपलक्षिताः॥")
चरणग्रन्थिः, पुं, (चरणस्य ग्रन्थिः।) गुल्फः। इति हेमचन्द्रः। ३। ६१५॥
चरणव्यूहं, क्ली, (चरणानां वेदशाखानां व्यूहोऽत्र।) वेदव्यासविरचितचतुर्व्वेदविवरणशास्त्रम्। तत्तु वेदशब्दे द्रष्टव्यम्॥
चरणायुधः, पुं, (चरण एवायुधं अस्त्रविशेषो यस्य।) कुक्कुटः। इत्यमरः। २। ५। १७॥ (पर्य्यायोऽस्य यथा,—
"कुक्कुटः कृकवाकुः स्यात् कलयश्चरणायुधः।
ताम्रचूड़स्तथा दक्षो यामनादी शिखण्डिकः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥ अस्य मांसगुणादिकं कुक्कुटशब्दे द्रष्टव्यम्॥
चरणास्त्रे, त्रि। यथा, रामायणे। ३।५६।३५।
"तुण्डपक्षप्रहारेण जटायुश्चरणायुधः॥")
चरमः, त्रि, (चरतीति। "चरेश्च।" उणां ५। ६८। इति अमच्।) अन्तः। पश्चिमः। इत्युणादिकोषः॥ (यथा, मनुः। २। १९४।
"उत्तिष्ठेत् प्रथमं चास्य चरमं चैव संविशेत्॥")
चरमक्ष्माभृत्, पुं, (क्ष्मां बिभर्त्तीति। भृ+क्विप्। ततः चरमश्चासौ क्ष्माभृच्चेति कर्म्मधारयः।) अस्ताचलः। इत्यमरः। २। ३। २॥
चरमाचलः, पुं, (न चलतीति पचाद्यच् अचलः पर्व्वतः। ततः चरमश्चासौ अचलश्चेति कर्म्मधारयः।) अस्तपर्व्वतः। इति त्रिकाण्डशेषः॥
चरमाद्रिः, पुं, (चरमश्चासावद्रिश्चेति।) अस्ताचलः। इति हेमचन्द्रः॥
चराचरं, क्ली, (चराचरयोः समाहारः।) जगत्। इति मेदिनी। रे, २९०॥ (तथा च मनुः। १।५७।
"एवं स जाग्रत्स्वप्नाभ्यामिदं सर्व्वं चराचरम्।
सञ्जीवयति चाजस्रं प्रमापयति चाव्ययः॥")
आकाशः। इति धरणी॥ जङ्गमाजङ्गमम्। यथा, देवीमाहात्म्ये।
"तया विसृज्यते विश्वं जगदेतच्चराचरम्॥"
चराचरः, त्रि, (चरश्चलं आचरो व्यवहारचेष्टादिकं तौ विद्येतेऽस्मिन्।) जङ्गमः। इत्यमरः। ३। १। ७४॥ इङ्गः। इति विश्वः॥ इष्टः। इति हेमचन्द्रः॥ कपर्द्दके पुं। इति राजनिर्घण्टः॥ (चरतीति चरो जङ्गमः अचरः स्थावरः। चरेण सह अचरः। स्थावरजङ्गमः। यथा, भागवते। ३। ९। ९।
"क्षुब्धोभान्योन्यमासाद्य यस्मिंल्लोकाश्चराचराः॥")
चरिः, पुं, (चर+"सर्व्वधातुभ्य इन्।" उणां ४।११७। इति इन्।) पशुः। इत्युणादिकोषः॥
चरितं, क्ली, (चर+भावे क्तः।) चरित्रम्। इति शब्दरत्नावली॥ (यथा, भागवते। १०।१।१।
"कथितो वंशविस्तारो भवता सोमसूर्य्ययोः।
राज्ञाञ्चोभयवंश्यानां चरितं परमाद्भुतम्॥")
तद्द्विविधं यथा, उज्ज्वलनीलमणौ।
"अनुभावाश्च लीला चेत्युच्यते चरितं द्विधा।
अनुभावा अलङ्काराख्याः उद्भास्वराख्याः वाचिकाख्याश्च। लीला स्याच्चारुविक्रीड़ा रासकन्दुकखेलाद्या चारुक्रीड़ा प्रकीर्त्तिता। ताण्डवं वेणुवादं गोदोहः पर्व्वतोद्धारो गोहूतिर्गमनादिका॥" (यथा, गीतगोविन्दे। १। २।
"वाग्देवताचरितचित्रितचित्तसद्मा॥"
वाच्यलिङ्गे तु। चर+कर्म्मणि क्तः। कृतम्। आचरितम्। यथा, रामायणे। १। ३। १।
"श्रुत्वा पूर्व्वं काव्यबीजं देवर्षेर्नारदादृषिः।
लोकादन्विष्य भूयश्च चरितं चरितव्रतः॥")
चरितार्थः, त्रि, (चरितः कृतः अर्थः प्रयोजनं येन सः।) प्राप्तप्रयोजनः। यथा, कुमारसम्भवे। २। ७।
"पुराणस्य कवेस्तस्य चतुर्म्मुखसमीरिता।
प्रवृत्तिरासीच्छब्दानां चरितार्था चतुष्टयी॥"